# gurupAdukApanchakam

# ગુરુપાદુકાપઞ્ચકમ્

## Document Information

Text title : gurupAdukApa.nchaka 1

File name : gurupAdukApanchaka.itx

Category : panchaka, deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : N.Balasubramanian bbalun at dataone.in

Proofread by : N.Balasubramanian bbalun at dataone.in

Latest update : March 29, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ગુરુપાદુકાપઞ્ચકમ્

જગજ્જનિ-સ્તેમ-લયાલયાભ્યાં અગણ્ય-પુણ્યોદય-ભાવિતાભ્યામ્ ।
ત્રયીશિરોજાત-નિવેદિતાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યમ્ ॥ ૧॥

વિપત્તમસ્તોમ-વિકર્તનાભ્યાં વિશિષ્ટ-સંપત્તિ-વિવર્ધનાભ્યામ્ ।
નમજ્જનાશેષ-વિશેષદાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૨॥

સમસ્ત-દુસ્તર્ક-કલઙ્ક-પઙ્કાપનોદન-પ્રૌઢ-જલાશયાભ્યામ્ ।
નિરાશ્રયાભ્યાં નિખિલાશ્રયાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૩॥

તાપત્રયાદિત્ય-કરાર્દિતાનાં છાયામયીભ્યાં અતિશીતલાભ્યામ્ ।
આપન્ન-સંરક્ષણ-દીક્ષિતાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૪॥

યતો ગિરોઽપ્રાપ્ય ધિયા સમસ્તા હ્રિયા નિવૃત્તાઃ સમમેવ નિત્યાઃ ।
તાભ્યામજેશાચ્યુત-ભાવિતાભ્યાં નમો નમઃ શ્રીગુરુપાદુકાભ્યામ્ ॥ ૫॥

યે પાદુકા-પઞ્ચકમાદરેણ પઠન્તિ નિત્યં પ્રયતાઃ પ્રભાતે ।
તેષાં ગૃહે નિત્ય-નિવાસશીલા શ્રીદેશિકેન્દ્રસ્ય કટાક્ષલક્ષ્મીઃ ॥ ૬॥

ઇતિ શ્રીગુરુપાદુકાપઞ્ચકં સમ્પૂર્ણમ્ ।

Encoded and proofread by N.Balasubramanian

*gurupAdukApanchakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*